Ind L
1501
14

# ŚRINGÁRA TILAKA.

BY

ŚRÌ KÁLIDÁSA,

WITH A COMMENTARY,

BY

KAVIRÁJ CHANDRA MAJUMDÁRA.

EDITED BY

KAYLÁS CHANDRA SÉN GUPTA,

AT THE REQUEST OF

BÁBU BHUVANA CHANDRA VASÁKA.

CALCUTTA:

PRINTED & PUBLISHED BY

BÁBU BHUVANA CHANDRA VASÁKA.
At the sangbàda Jnànaratnàkara Press.
No. 8 Nimtollah Ghat Street.

1871.

Digitized by Google

# शृङ्गारतिलकम् ।

## महाकविकालिदासविरचितम् ।

वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्र मजुमदार
प्रणीतया शान्तिपथटीकया समेतम् ।

श्रीयुक्तभुवनचन्द्रवसाकमहोदयस्यानुरोधेन

श्रीकैलासचन्द्रसेनगुप्तेन परिशोधितम् ।

कलिकातायाम्

त्रिनवत्यधिकसप्तदशशतशाकीय सौराग्रहायणस्य
पञ्चदशदिवसे

श्रीयुतभुवनचन्द्रवसाकमहोदयस्य प्रार्थनया
तद्द्वारैव संवादज्ञानरत्नाकरयन्त्रालये
मुद्रितम् ।

( निमतला घाट ष्ट्रीट ८ संख्यक भवन )

Digitized by Google

# विज्ञप्तिरियम् ।

महाकुलसम्पन्नभिषग्वृन्दवन्दितकुलविष्णुदास-कुलसम्भूतः कविवत् कविकुलावतंसोऽनन्यसाधारणधीविद्यासाध्योत्तररराघवपाण्डवीयादिग्रन्थप्रणयनैः क्षितितले लब्धैकविमलयशाः कवीन्द्रवरः श्रीमत्कविराजचन्द्रो महाकविगणाग्रगण्यश्रीमत्कालिदासविरचितद्वाविंशतिश्लोकसम्पूर्णशृङ्गारतिलकनामग्रन्थस्य सर्व्वजनविज्ञातशृङ्गाररसविपरीतशान्तिरसव्याख्यायिनीं घोरसंसारपाशमोचनैकसाधनशान्तिरथाकृष्टमनसां विदुषां सान्त्वोल्लासिनीं टीकां प्रणीतवान् । सटीकरघुवंशादिमहाकाव्यमुद्राङ्कयद्भिः सूरिभिर्ग्रन्थस्य क्षुद्रकायत्वादलाभाद्वा शान्तिपक्षटीकया शृङ्गारतिलकं न मुद्रितम् । अधुना तदर्थकौशलरसोत्तमतोषितमनस आयुर्व्वेदादिविविधसंस्कृतग्रन्थमुद्राङ्कणप्रभूतयशसो देशभावुकभावनैकनिश्चयस्य तन्मुद्राङ्कणोत्सुकस्य श्रीयुक्तभुवनचन्द्रवसाकमहोदयस्यानुरोधेन मया यथासाध्यं परिशोधितम् ।

अज्ञानतो मेऽनवधानतो वा शुद्धेषु येऽत्रस्खलशोधनीयः ।
वर्णादिदोषः कृतिभिर्धृतार्थैर्यासुवर्णस्य हि दोषहारैः ॥

काशीयानी निवासिनः ।

श्रीकैलासचन्द्र सेनगुप्तस्य ।

Digitized by Google

Ind L 1501.14

HARVARD
UNIVERSITY
LIBRARY

Digitized by Google

। दुर्गायै नमः ।

# अथ शृङ्गारतिलकम् ।

**बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं श्रोणीतीर्थशिला च नेत्रसफरं धम्मिल्लशैवालकम् । कान्तायाः स्तनचक्रवाक-**

यदङ्घ्रिवारिजरजःपरमाणोरनुग्रहात् । नश्यत्यशान्तितिमिरं तं वन्दे गुरुमव्ययम् ॥ श्रीकालिदासेन कवीन्द्रवृन्दशिरोवतंसेन कृतेष्वमीषु । श्लोकेषु मौद्गल्यकुलप्रसूतस्तनोति टीकां कविराजचन्द्रः । सर्व्वैरत्र शृङ्गाररसस्य पन्थं पश्यन्ति शान्तस्य तु वेत्ति कश्चित् । प्रच्छन्नभूतं सुतरां यथास्मिन् देहे निविष्टं परमं पुमांसम् । सम्प्रदायविरहादिह च या शान्तिपद्धविवृतेर्न कूटता । दूष्यतां समवलम्बतां पुनः कल्पनान्तरमतिं सदच्छताम् ।

इह महाकविश्रीकालिदासः प्रसादवत्पदप्रतिपादितशृङ्गाररसतिरोहितं काष्ठपुटकादिकरणकस्थमितमणिन्यायेन, शान्तिरसमाहितवान् तादृशशब्दोपन्यासेन च शृङ्गाररसस्यापाततोमधुरत्वं सर्व्वसाधारणत्वञ्च शान्तस्य पुनस्तदतिरेकित्वमभिप्रेतवान् । तत्र प्रथमं शान्तिवर्त्मन्युपदेष्टव्ये कान्तायाः शान्त्यन्तरायभूतत्वात् परिहारमुपदिशति ।

बाहू इत्यादि । हे शिव इत्यर्थाद्दग्धानां लोकानां व्याघ्र-तानां हतादिवद्दग्धशब्दः कोपविषये यथा प्रयुक्तं भवभूतिना दग्धहृदय कोटयमाकस्मिकस्ते पारिप्लवो विकार इति । कन्दर्प-

युगलं कन्दर्पबाणानलै र्दग्धानामवगाह-
नाय विधिना रम्यं सरोनिर्म्मितम् ॥१॥
आयाता मधुयामिनी यदिपुनर्नायातएव
प्रभुः प्राणायान्तु विभावसौ यदिपुन-
र्जन्मग्रहं प्रार्थये । व्याधः कोकिलबन्धने

बाणानलैः कामशराग्निभिः करणै र्गाहनाय, आकुलीकरणाय, विधिना निर्म्मितं कान्ताया देहरूपं सरोऽरम्यमरमणीयं, अत्र, जानीहि । तत्र कदाचिन्नरतिःकार्य्या तन्निर्म्माणस्यपरपीड़नमात्रप्रयोजनकत्वान्नवि इन्मोहोयुक्तः अतो दग्धानामित्युपन्यस्तम् । सरःसाधर्म्म्यमाह बाहू इत्यादिना तीर्थशिला अवतार पाषाणः, धम्मिल्लः संयताःकचा इत्यमरः । अन्यत्तु सुबोधं, तीर्थं शास्त्राध्वर क्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बु पात्रोपाध्यायमन्त्रिषु, इति मेदिनिः । अत्रावतारोर्थः । अवरत्वे गतौ कान्तौ प्रीतौ तृप्तौ स्मृतौ स्तुतौ । स्वाम्यर्थेऽवगमे कामे ह्रताविति वोपदेवः ॥ १ ॥

आयातेति । आत्मज्ञानाक्षमस्य निश्चितमरणावश्यम्भावस्य प्राणत्यागायोद्यतस्य कस्यचिदुक्तिरियम् । यामिनी कालरात्रि र्मरणकरी; अधु, नविद्यते धुः कम्पनमभिभवोयस्य तादृशं यथा-स्यात्तथा आयाता आयास्यति सत्वरी एतदनन्तरम् आङ्निश्चये आङ् ज्ञाननिश्चययोरिति मेदिनिः । यदिपुनःप्रभुरात्मानयातोनज्ञातः आत्मज्ञानं नोत्पन्नमित्यर्थः । न इत्यतः आः पीड़ायां, आस्तुस्यात्कोपपीड़योरित्यमरः । तदाप्राणा विभावसौ वह्नौ यान्तु, अग्निरेव प्रवेष्टव्य इत्यर्थः । अहं पुनर्जन्मग्रहं न प्रार्थये इत्यतोऽशब्दोनञर्थःप्रत्येतव्यः, अशब्दःस्यादभावेपि स्वल्पार्थ प्रतिषेधयोरिति मेदिनिः । यदिशब्दो गर्हायां

Digitized by Google

हिमकरध्वंसे च राहुग्रहः कन्दर्पैहर-
नेत्रदीधितिरहं प्राणेश्वरि मन्मथः ॥ २ ॥
इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन
दन्तमधरं नवपल्लवेन । अङ्गानि चम्पक-
दलैः स विधाय वेधाः, कान्ते कथं घटित-
वानुपलेन चेतः ॥ ३ ॥

यदि गर्हाविकल्पयोरिति कोषः । नानारूपेण सकलसंघातु-
कत्वं बोधयितुं कालरात्रिं विशिनष्टि व्याधः कोकिलबन्धने इत्यादि तस्यास्तत्त्वनिरूपणाय पुनर्विशिनष्टि इमन्मथः प्राणेश्वरेति इः कामस्तस्य मदं मथ्नाति सः क्विप् तस्य शिवस्य प्राणेश्वरास्त्रीं शिवस्य हृदम्भोजस्थिता संहाररूपिणीति, तोऽईलतन्त्रे, ईश्वरेति ईशेर्वरप्रत्ययान्तादाप्रत्ययः ईप्रत्ययस्तौ-णादिकवरट्प्रत्ययान्तादिति ॥ २ ॥

इन्दीति । नरोनयनादौ नीलोत्पलादिभ्रमशालिनां रागिणां मोहं निरसितुं कारणोपन्यासद्वारा जुगुप्सितत्वं प्रतिपाद्य मोह-कारणमपह्नुवति । वेधाः स्रष्टा उ भोः नयनम् इन्दीवरेण न घटितवान् मुखं नाम्बुजेन दन्तं न कुन्देन अधरं न पल्लवेन अ-ङ्गानि न चम्पकदलैः, तर्हि केनेत्याह पलेन मांसेन अत्र पलपदं जुगुप्सितत्वसमवायिसामग्रीसम्भारोपलक्षणं तेन दन्तम् इत्यने-नान्वयः संगच्छते, ननु तदा कथमेवं प्रतिभास इत्याह चेतो मनः का-न्ते कथं कान्ताकमनीया इत्यथा कामकथावस्यताहशं विधायकत्वा नयनादिकानिन्दीवरादिमेव घटितवान् तस्मात्कामानुरागादेव जुगुप्सितेऽपि वस्तुनि रमणीयताप्रतिभास इति सर्व्वथा काम-स्य परित्यागः करणीय इत्युपदेशः । नवपल्लवेनेत्यत्र नवेति-

**एकोहि खञ्जनवरो नलिनीदलस्थो दृष्टः**
**करोति चतुरङ्गबलाधिपत्यम्। किम्वा**
**करिष्यति ममद्भुतमारविन्दे जानामि नो-**
**नयनखञ्जनयुग्ममेतत् ॥ ४ ॥**

पदद्वयं नञ्निषेधार्थः वशब्दइवार्थः वरुणो वः समाख्यात इवार्थेषतदव्ययमिति कोषः। पलमुन्मानमांसयोरिति मेदिनिः। इकारः कथ्यते कामइत्येकाक्षरकोषः ॥ २ ॥

एक इति। एकः केवलोऽद्वयरूपः पदार्थः जनवरः अनमुत्पत्तिं वरति विचारवतीत्यत्र भवच्छेदक इत्यर्थः इत्र आवरणे वा वरादिः। निवरते विलं मञ्जोपद्रवमित्यस्यैव प्रयोगः वृक्षिनो प्रधानपद्मं सहस्रदलाख्यं तद्दलसमीपकर्णिकान्तर्गतः दृष्टः प्रत्यक्षीकृतश्चेत् खं निरतिशयसुखं करोति ब्रह्मानन्दस्य सर्वानन्दातिशयित्वात् नन्वेवं विदुषाश्रवता मक्षिं मनिरीक्षते, आह-एतन्नयनखञ्जनयुग्मं तं ते आर दृष्टुं न प्राप। अतो नाहं विन्दे नलभइति आहत्योऽभवत्सान्त्वीयते, अभावार्थोऽशब्दोवाप्रश्नेऽयः। अभावे नह्यनोनापीत्यमरः। खञ्जनरूपनयनसेन नैसर्गिकलौल्यं ख्यापितं, किंभूतं भवत्, आभियुक्तम्। भः पुंसि भार्गवश्चान्त्योरिति कोषान्तरम्। ज्ञाननयनावलोक्यस्य पुनः एतन्नकनावलोक्यत्वं ज्ञाननयनैतन्नयनयोर्वैलक्षण्यं दृष्टान्तेन साधयति। वद कथय अजानां छागानाम् इनो नेता किं तुरङ्गमबलाधिपतेः कर्म्म करिष्यति तस्माद्यथा अजपालतुरङ्गपालयोः पशुपालत्वाभेदेऽपि कर्म्मणि महद्वैलक्षण्यं तथैतन्नयनज्ञाननयनयोरपि अवलोकनकारणत्वाभेदेऽपि महद्वैलक्षण्यमिति। आधिपत्यम् इति कर्म्मणि यण्ब्राह्मण्यमित्यादिवत्। एमिन्द्रिये पुंसि चेते सूर्य्ये

**येये खञ्जनमेकमेव कमले पश्यन्ति दैवात्**
**क्वचित् ते सर्व्वे कवयो भवन्ति सुतरां प्र-**
**ख्यातभूमीभुजः। त्वद्वक्त्राम्बुजनेत्रखञ्जन-**

खिन्दौ विहायसि। संवेदने देवलोके शर्म्म ख्यपि नपुंसकमिति मेदिनिः। इनः पत्यौ नृपार्कयोरितिच॥ ४॥

येये इत्यादि। अङ्गमहिमानं स्तौति येये कवयो योगपण्डिताः कवय इत्यत्र क्वचिन्नइतिप्रायः पाठः एकमेव अङ्गरूपं दैवात् भाग्यात् क्वचित्स्थले गृहे तपोवनेवा पश्यन्ति, ते सर्व्वे सुतरां अतिशयेन प्रख्याता या भूमीस्थानं सत्याख्यं तद्भुजो जायन्ते। भूमीक्षितौ स्थानमात्रे इति वैजयन्ती। कुलकमले सहस्रदलाख्ये किंभूतम् अङ्गं पाणिपादादीन्द्रियरहितं तथाच अपाणिपादोजवनो ग्रहीतेत्यादि तथाजनं जनयतीत्यच् सर्व्वोत्पादकमित्यर्थः। तदीयस्यैलिङ्गानामेव जन्तुरूपत्वात्। हे मुग्धे त्रैलोक्यसुन्दरि भगवति येये जनास्तवखं चरणरूपमिन्द्रियं पश्यन्ति तथा तदीयमम्बु धावनतोयं पश्यन्ति सेवन्ते धातूनामनेकार्थत्वात्। तेते अत्र-जने जन्मनि कलाः कं सुखं लान्ति लभन्त इत्यर्थः जनयुगं जन्मद्वयं नपश्यन्ति एतज्जन्मनैव तेषां जन्मसमाप्तिर्भवतीत्यर्थः। एतेनैहिकपारत्रिकाभिमतसम्पादकत्वम्। अत्राप्यशब्दःप्रश्नार्थः त्वद्वक्त्रात्वदीयस्तावकेन सह सोपि तथैवस्यादित्यर्थः इतीदंकिमद्भुतं नाद्भुत मित्यर्थः। तस्मादङ्गावलोकनचरणावलोकादिनोस्तुल्यत्वमिति। वक्त्रेति वचनमिह स्तुतिरूपतया परिणमति। अतएवार्थान्तरसंक्रमितवाच्यो ध्वनिरयं लक्षणामूलः प्रयोजनञ्च स्वच्छन्दप्रकृमरत्वप्रतिपादनं तथाच भरतः अविवक्षितवाच्योय स्तत्रवाक्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतमिति अत्रैवोदाहृतं काव्यप्रकाशकारेण त्वामस्मिवच्मिविदुषां

युगं पश्यन्ति येये जनास्तेते मन्मथबाण
जालविकला मुग्धे किमत्यद्भुतम् ॥ ५ ॥
झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते
ग्रहणसमयवेला वर्त्तते शीतरश्मेः । तदिह

समवायोऽवतिष्ठति । आत्मीयां मतिमादाय स्थितिमत्र विधेहि- तदिति, कान्तवचनाद्युपदेशादिरूपतया परिणमति । एवं कि- म्भूतं मन्मथबाणजालवि, मन्मथं कामं बालिशा छिन्नत्तिशा बा- गतिगन्धनयोः अत्र गन्धनं हिंसा वतगश्च अर्हनइत्यस्य प्रयो- गात् स शिवस्तस्य बाणजालं प्राणजालं व्ययति संवृणोति व्येञ् संवरणे क्विपि संप्रसारणं तद्दीर्घमन्तरमिति दीर्घत्वे नपुंसकत्वाच्च- णोह्रस्वः पञ्चेन्द्रियाणि सोमोऽग्निर्वायुः सत्वं रजस्तमः । भूता- त्माच मनश्चेतिप्राणाः प्रोक्तास्त्रयोदशेत्यायुर्वेदे इयमत्रागमशास्त्री हृदयावस्थितया भगवत्या भगवान् खलुसंहारादिविभुर्यदा सा- व्यक्तरूपाभूत्तदा तां हृदयाद्बहिर्गतामाकलय्य शिवः शवरूपो- ऽभूदिति । बाणेति अण प्राणनइत्यतो दैवादिकाद्घञ् मूर्द्ध- न्यं णोत्वमिति वोपदेवः रमानाथेनाप्येक इत्यनेन तन्मतमनुगृ- हीतम् ॥ ५ ॥

झटितीत्यादि । कस्यचिद्योगिनोऽयमुपदेशः । झटिति- शीघ्रम् अशीतरश्मेः अशीता अनलसाः सन्ततो शिवमरा रश्म- योज्योतींषि यस्य तस्य परमब्रह्मणः । यद्वा हे अशीत अनलस रश्मे महाज्योतिःस्वरूपस्य ब्रह्मण इति । तस्य गेहं स्थानं सत्यलोकाख्यं प्रविश कुत्र कान्ते कं शिरस्तत्र अन्तशब्दः स्वरूपे शिरोऽत्र सुमेरोरेव तत्रैव सत्यलोकावस्थानात् । तदुक्तं भगवता शिवेन श्रीनिर्व्वाणतन्त्रे । ज्ञानपद्मस्योर्द्धदेशे सहस्रदलपङ्कजम् । अधोवक्त्रं हि तत्पद्मं सुमेरोर्मूर्ध्नि संस्थितम् । इत्युपक्रम्य-

Digitized by Google

विमलकान्तिं वीक्ष्य नूनं सराङ्ग ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय॥ ६॥

कस्तूरीवरपत्रभङ्गनिकरो मृष्टो न गण्डस्थले नोलुप्तं सखि चन्दनं स्तनतटे धौतं न नेत्राञ्जनम्। रागो न स्खलित

पद्ममध्ये वीजकोषे भुवनानि चतुर्द्दश। स्थानं बहुविधाकारं सर्व्वदेवस्य चाश्रयम्। तन्मध्ये सत्यलोकञ्च महारुद्रस्य कारणमित्यादि। वह्निर्भूर्लोकादि षट्के मा तिष्ठ कुतद्रत्याह, हृद्वह्निस्तव यहणसमयवेला वर्त्तते यहणं कालग्रस्तता। तस्य समयो निश्चयः स एव वेलावेष्टनं सोऽस्ति भूर्लोकादिषट्कस्यानित्यत्वात् तत् स्थानमप्यनित्यमिति। कथं प्रवेष्टव्यमित्युपायमुपदिशति। मुखेन्दुं वीक्ष्य मुखे मुखसमीपे इन्दुर्यस्य तं चन्द्रशेखरमाराध्य। सत्यलोकस्याविनश्वरत्वमितरेषां तद्व्यतिरेकञ्चोपपादयति मम मुखेन्दुः शिवोरुद्ररूपेण तद्ब्रह्मणो गेहं विहाय यसति सर्व्वमित्यर्थः। राङ्गः पूर्णचन्द्रमिवेति लुप्तोपमा विमलकान्तिमिति मुखेन्दुविशेषणम्। शीतोऽलसश्च बहुवारतरौच हृष्टइति धरणिः कंशिरोऽम्बुनोरित्यमरः। खन्तं स्वरूपे नाशे नामस्त्रीगेषेऽन्तिके त्रिष्विति मेदिनः॥ ६॥

कस्तूरीत्यादि। अकृतमानसयागस्य कस्याश्चिदनुगयोक्तिरियम्। हे गजेन्द्रमन्दगमने गजेन्द्रं मन्दयतीति गजेन्द्रमन्दः सिंहस्तेन गमनं यस्याः हे सिंहवाहिनि इत्यर्थः। मम स्तनतटे स्तनसमीपे हृदयेऽनाहताख्यसरोजावच्छिन्नमानसयागविषये, तव गण्डस्थले कस्तूर्य्युत्तमचित्रविशेषव्यूहः नमृष्टः नदत्तः। किमित्याक्षेपे चन्दनं नोलुप्तं किन्तु विच्छिन्नमेव तदपि नदत्त-

स्तवाधरपुटे ताम्बूलसम्बर्द्धितः किं दृष्टासि
गजेन्द्रमन्दगमने किंवास्मद्गुरुस्तेपतिः ॥ ७ ॥
समायाते कान्ते कथमपिच कालेनबहुना
कथाभिर्देशानां सखिरजनिरर्द्धं गतवती

मित्यर्थः। तवाधरपुटे ताम्बूलजनितो रागोनोऽस्माकं सम्बन्धे नकिं स्खलितः ताम्बूलमपिनदत्तमित्यर्थः। मृदुरिति रागविशेषणम्। तथानेत्वा नायकेन शिवेन सह ते तव अङ्गनं मिलनं नधौतं न चिन्तितं ध्यानोपदत्तस्थाने शिवेन सार्द्धं तवसुखादिकापिन ध्यातेत्यर्थः। हे सखीति शिवस्येत्यर्थात् यद्वा हृदय विशेषणमेतत् तथाहि सखायमाचष्टे टह्लाति वेतीनन्तात् क्विप्। तथाच चेतसो मिथ्याज्ञानेनप्रयोजितमित्वानुरागवशादेवायमस्माकमनर्थ इति। पति त्वं किं दृष्टासिपतिःसर्व्वेश्वरी पतिःस्त्रियाऽपि वर्त्तत इति श्रीपतिः अतएवामरेणापि धिन्ध्यनिम्न उक्तः न स्खलित इति शषसेष्वघोषपरेषु इत्यादिना विसर्गलोपः ॥ ७ ॥

समायात इत्यादि। प्राग्विविक्तस्य पश्चादसत्सङ्गेन ततोऽत्रष्टस्य कस्यचिदनुशयोक्तिं वर्णयति देशानामुपदेष्टॄणां कथाभिर्बहुनाकालेन कथमपि कष्टदृष्टप्रकारेण अकान्ते कं सुखं तद्विपरीतमकं तस्य सांसारिकदुःखस्यान्ते मार्गे समायाते संप्राप्ते सखिरजनिरर्द्धं सख्युर्मोहसहायभूतस्य रजस्य मध्यमगुणस्य निरर्द्धं वधुवृद्धौ घञि वर्द्धोऽवृद्धिस्तस्याभावेन वाहृतीयासप्तम्योरित्यम्। प्रियतमे पुत्रादौ लीलागतवती नष्टा। ततोऽनन्तरमसत् संसर्गेण यावदहं कलहकुपितास्मि कलहस्य कुत्सितः पिता जनकोऽस्मि, तमःसमुदयात्। तावत् सपत्नीव सपत्नः शत्रु लसत्स्त्रीव इयं प्राचीदिक् प्राचीनादिशा पूर्व्वावस्थाभवत्

Digitized by Google

ततो यावल्लीलाकलहकुपितास्मि प्रियतमे
सपत्नीव प्राची दिगियमभवत्तावदरुणा ॥ ८

श्लाघ्यं नीरसकाष्ठताडनशतं श्लाघ्यः प्रचण्डातपः क्लेशः श्लाघ्यतरः सुपङ्कनिचयैः श्लाघ्योऽतिदाहानलः । यत्कान्ताकुचपार्श्वबाहुलतिका हिल्लोललीलासुखं लब्धं कुम्भवर त्वया नहि सुखं दुःखैर्विना लभ्यते ॥ ९ ॥

किंभूता अरुणा अरुणयति क्रोधादिना विकृतिजननीत्यर्थः । सुखशीर्षजलेषु कमिविं मेदिनीकरः । रजोऽस्त्रीपरागे स्यादार्त्तवे च गुणान्तर इति जान्ते । सएवात्र अर्थः पादरजोपमा इत्यस्य प्रयोगः । एतावताऽसत्संसर्गस्य विवेकभङ्गहेतुत्वेन सर्व्वथा परिहरणीयत्वमित्यवधेयम् ॥ ८ ॥

श्लाघ्यमित्यादि । हे कुम्भवर कुम्भं कुम्भकं प्राणायामाङ्गं वृणुते वर्जयति यस्तदामन्त्रणं हरु सम्भतौ अथ वदा कुम्भोवारस्त्रीकामुकस्तं वरति वारयति । असत्संसर्गहीनेत्यर्थः । कुम्भप्रमाणमध्ये वक्ष्यते । यद्यतः कान्तायाः कुचादीनां हिल्लोलस्य दोलनस्य यालीला तद्रूपा वा लीला तत्सुखं त्वया नहि लब्धम् । कान्तासंसर्गपरित्यक्तः, अतस्ते नीरसकाष्ठताडनशतं श्लाघ्यं रसस्याभावो नीरसं तत्काष्ठाऽपर्षेयस्य तस्यभावस्तत्ता तया तस्यां वा काष्ठताडनसुखमसतं श्लाघ्यम् । काष्ठ अध्यमे युट्, पङ्किनियमदं वकवडुर्मोपसम्पयाम अन्यत् सुबोधम् । नतु कान्तासङ्ग परित्यागपूर्व्वकं प्रचण्डातपादिकं सहिष्णुतया परत्रापि सुख

किं किं वक्त्रमुपेत्य चुम्बसि बलान्निर्लज्ज-
लज्जा क्व ते वस्त्रान्तं शठमुञ्च मुञ्च शपथैः
किं धूर्त्तवाग्बन्धनैः। खिन्नाहं तव रात्रि
जागरवशात तामेव याहि प्रियां निर्म्मा-

पुत्पादनीयमिति, क्लेशानर्थक्यमाशङ्क्य समाधत्ते सुखमित्यादि दुःखैर्ह्यिकैर्विना सुखं भ्रशम् अतिशयितं खं शर्म्म न लभ्यते विना-इत्यतः अकारः प्रश्लेष्यः, तस्मात् ऐहिकसुखनिरसनेन प्रचण्डातपादि यत्किञ्चिद्दुःखं स्वीकृत्यापरत्र निरतिशयसुखसम्पत्तिरिति। कुतः क्लेशानर्थक्यमिति। काष्ठोत्कर्षस्थितौ दिशो अमरः। हिल्लोलत् कण्ठदोलनइति वोपदेवः। सुपूजायां भृशार्थे चेति मेदिनिः। खशब्दश्चनार्थां प्रागुक्तम् ॥ ९ ॥

किं किमित्यादि। कश्चिद्योगी कञ्चिदुपदिशति। हे निर्लज्ज ते लज्जा क्वगता। किं किं इत्याद्येमे वक्त्रमुपेत्य बलादनौचित्यात् चुम्बसि मुखमस्तीति तत्त्वैव सकलपदार्थं स्वेच्छया स्तोकं स्तोकं प्रसीषि निद्राशानिवर्त्तनेन सर्व्वेषां किञ्चित् किञ्चित् प्रसाय चुम्बनं, शपथैः त्रियशिरस्पर्शादिभि मिथ्यानिरसनैः शठं शाठंग मुञ्चत्यज, शठ कैतवे भावे क्विप् धूर्त्तवाचा बन्धनैः किं छलवागुपन्यासैः किं शपथैः मूर्त्तिरागोप्यते इतिपाठे शाठ्यं मया नकरिष्यते तवाभीशपथाः प्रत्ययका इत्युक्तावपि शपथैः किं शाठ्यस्वमूर्त्तिः स्वरूपमागोप्यते आच्छाद्यते शपथेषु कृतेष्वपि कृतं शाठ्यं स्वयमेव प्रकाशत इत्यर्थः। अनन्तरं कर्त्तव्यमुपदिशति, इन्द्रानुकम्पादौ चावरा श्रेष्ठा ए प्रियाश खिन्ना तंद्रष्टुं व्याकुला इत्यर्थः तामेव हि प्रियां कुलकुण्डलिनीं तं त्वं शिवस्य अथ संयोजनेन प्रीणीहि, किं कृत्वा निर्म्माल्य, मल मल्ल धारणे वायुं

त्योरुज्झित पुष्पदामनिकरे का षट्पदा-
नां रतिः ॥ १० ॥

वाणिज्येन गतः स मे गृहपतिर्वार्त्ताऽपि न
श्रूयते प्रातस्तज्जननी प्रसूततनया जामातृ

धारयित्वा इत्यर्थः प्राणमन्त्रोच्चारणपूर्वकवायुसञ्चारणेन तयोः संयोगात् । एतेन मन्त्रचैतन्योपाय उपदिष्टः सा कीदृशी त्रिपुरुषेषु सत्वादिषु जागरोऽवबोधस्तस्य वश मतति सततं प्राप्नोति अत सातत्यगमने क्विप्, तां कीदृशीम् अवस्थां वस्तुपदमावरणमात्रोपलक्षणां विरावरणां स्वतन्त्रामित्यर्थः । शठमित्यतोऽनन्तरम् उञ्चेति पदद्वयम् । उकारः शङ्करः प्रोक्त इत्येकाक्षरकोषः । तामित्यत एव इति चतुर्थ्यन्तम् आः स्याच्छङ्करवेधसोरिति धरणिः । नित्यं कर्म्मणि तुमोऽप्रयोगिणाइति चतुर्थी आधातोरियत्र धातुपणस्याश्रवणोपलक्षत्वाल्लोपे प्रत्ययमात्रं पदं ततः अवेति क्रियापदम् । तयोः प्रीतिरन्यतो न सम्भवतीति साधयितुमाह उज्झितेत्यादि षट्पदानां भृङ्गाणाम् उज्झितपुष्पदामनिकरे उज्झितमलब्ध पुष्पदामयेन तादृशि समूहे कारतिः प्रीति र्नकापीत्यर्थः यथा मधुरयस्त्वन्तरलाभेऽपि मकरन्दालब्धाभृङ्गाणां न प्रीतिस्तथातयोर्नान्या व्याप्यप्रीतिरिति । स्तोमौधनिकर व्रात वारसंवात सञ्चयाइत्यमरः ॥ १० ॥

वाणिज्येनेत्यादि । कस्यचिज्ज्ञानात्मनःपरामर्शोऽयं सगृहपतिः गृहस्य देहरूपस्य पतिर्जीवात्मा वाणिज्येन हेतुना मातृगेहं मातृगर्भरूपंस्थानं गतः मारवसूयवनरचास्वाभिमतफलसम्पादकत्वसम्भावनात् । प्रातः सृष्टि समये प्रातः पदं सृष्टिकालपरम् । निशापदं क्षयकालपरम् । दिनरात्र्योरुदयक्षयकत्वत्वेनोक्तत्वात् । अजोविष्णुःसम्बन्धित्वेन विद्यते यस्याः सा

Digitized by Google

गेहं गता। बालाहन्नवयौवना निशि-
कथं स्थातव्य मस्मदगृहे सायं संप्रतिव
र्त्तते पथिक हे स्थानान्तरे गम्यताम्॥११॥
यामिन्येषा गहनजलदैर्वद्धभीमा
न्धकारा निद्रां यातो गृहपतिरसौ

अज्ञात्रैष्णवीमायया न जायतइत्यन्यतोऽपिचेतिडःप्रत्ययो वा नित्वेत्यर्थः तत्रगतासती अहन् कर्त्तव्य विस्मृतिमुत्पाद्यतं हतवती गतस्यमेगृहपतेरिति षष्ठ्यन्तपाठे हिंसार्थत्वात् कर्म्मणि षष्ठीबोध्या कीदृशी प्रसूततनया प्रसूर्माता तयेव ततः प्रकटितः नयोनीतिर्यया। एतेन मायाचरितमहितं तेन नज्ञायतइति। तथा बाला बालं मूढं करोतीति इनन्तादच् मोहजननीत्यर्थः मूर्खेऽर्भकेऽपि बालः स्यादित्यमरः। तथा नवयौवनाष्टङ्गाचिरन्तनीत्यर्थः। प्रतिक्षणमजीर्णतया प्रतिभानान्नवयौवना वा अतोऽस्मात् सकाशात् तज्जननीवाणिज्यजननी वार्त्तापि नश्रूयते तेनेतिशेषः तत्रावज्ञायतइत्यर्थः निशिक्षयकाले गृहे स्थूलशरीरे कथं स्थातव्यं तदानीं स्थातुं नशक्यत इत्यर्थः। सामाया अयं आत्मापथिवर्त्मनिवर्त्तते संप्रतिमेमया कहे कं यमं हन्ति यमाविषये स्थानान्तरे स्थानविशेषे सत्याख्येगम्यतां नीयताम् इनन्तात् पञ्चमी परमब्रह्मणि लीनीक्रियतामित्यर्थः जयजयजह्यजामजित दोष गृहीत गुणामिति श्रुत्यध्याये अजां मायां जहीति श्रीधरस्वामीव्याचष्टे। कोब्रह्मणि समीरात्मायमदक्षेषु भास्करइत्यादि मेदिनिः। ते इतिस्यात्त्वयेत्यर्थे मयेत्यर्थेच मे इतीतिपुरुषोत्तमः ॥११॥

यामिनीत्यादि। कश्चिन्मनीषाजीवात्मनः प्रबोधायप्रयतते, हे गहन जलदरूपैर्ध्यानैर्भिर्वद्ध एषा संसृतिरूपायामिनी

लोभितः कर्म्मदुःखी । बाला चाहं मनसिजभयात्प्राप्तगाढप्रकम्पा ग्रामश्चौरैरयमुपहतः पान्थनिद्रां जहीहि ॥ १२ ॥
इयं व्याधायते बाला भूरस्याः कार्मुकायते। कटाक्षाश्च शरायन्ते मनो मे हरिणायते॥१३
क्व भ्रातश्चलितोऽसि वैद्यकगृहं किन्तत्र

यमसम्बन्धवर्ती भीमा अन्धकारा अन्धयतीत्यन्धकारा बन्धनालयः कारा स्याद्बन्धनालय इत्यमरः। असौ गृहपतिः साक्षिरूपः परमात्मा अनिद्रां जागरणं यातः जागरूकः सकलं पश्यतीत्यर्थः कीदृशः लोभितः उत्तप्तः यतः कर्म्मदुःखी कर्म्मणा त्वदीयेन दुःखवान्। यद्यपि साक्षिणः पारमार्थिकदुःखं नास्ति तथापि अनुचितदर्शनादागन्तुकं तदस्तीति। अहञ्च बाला मनःसमुत्पन्नभयात् प्राप्तातिशयकम्पा, अयं ग्रामो देहरूपश्चौरैरिन्द्रियाख्यैरुपहतः। हे पान्थ पथिक निद्रामज्ञानं जहीहि त्यज। पान्थेति साक्षेपसम्बोधनं यथा कश्चित् पान्थो गृहस्थस्य चतिद्वयोरुदासीनतामवलम्बते तथा त्वमप्युत्पद्यमानेऽप्यात्मनो दुष्कर्म्मण्युदासीनतामाचरसीति ॥ १२ ॥

इयमित्यादि। कश्चिज्जितेन्द्रियः स्वभावं प्रकटयति। मे मम मनोहरिणा क्षणेन सह हेतुना वा अयते गच्छति अत्र इयं बाला व्याधवदाचरतीत्यादि स्फुटं बालादीनां घातुकत्वेन न तत्र मे मनः प्रवृत्तिरिति भावः ॥ १३ ॥

क्व भ्रातरित्यादि। हे भ्रातः क्व चलितः प्रस्थितोऽसि, स आह वैद्यकस्य प्रयत्नवैद्यस्य गृहं प्रश्नापुनराह किन्तत्र इदमिति स

शान्तोऽद्य रुजां किन्तु नास्ति गृहे सखे प्रियतमा सर्वान् गदान् हन्ति या ॥ वातश्चेत् कुचकुम्भमर्दनवशाल्लिप्तश्च वक्त्रामृतात् श्लेष्माणं विनिहन्ति हन्त सुरतव्यापारके-

आह रुजां शान्तिरिति । प्रष्टा भूयो वदति हे प्रिय हे सखे तेन वैद्यद्वारा रुक्शान्तिरूपेण कर्मणा किं कृतमित्याह तमा-कालरात्रिरस्ति या सर्वान् हन्ति तस्माद्रोगमात्रशान्त्यापि न सुखमित्यर्थः । ननु यद्येवं तदा किं विधेयमिति सदाचरित-मुपदिशति अतः कारणात् चेत् ज्ञाता सुरतव्यापारके कुत-सिते सुरतव्यापारेऽस्ति आसक्ता सत् समास्तपःकरणात् पित्तं श्लेष्माणं दोषमात्रोपलक्षणमेतत् तज्जन्यान् गदान् वा रोगांश्च विनिहन्ति तथा कुष्ठज्वरादि पञ्चभूतश्च विनिहन्ति पञ्चानामेक-तमविध्वंसे सर्वेषामेव विध्वंसात् निर्वाणमासादयतीत्यर्थः । अ-त्र हेतुगर्भं तपोविशेषणं वक्त्रामृतात् वक्त्रमुखे मृतं मोक्षो यस्य वशीकृत मोक्षादित्यर्थः । हि किंच सङ्कुचित जडेति यावत् । मं भ्रान्तिं रोगशान्तिप्रयत्नादिरूपां न अर्हं प्राप्नुहि भ्रान्तिं त्यजेत्यर्थः । अर्दगतौ याचनेच वशादितीन्द्रिय वशीकरणात् तस्मान्मरणस्यावश्यंभावित्वेन तपसैव सकलोप-तापशान्तिः कार्या नान्यथेति । तमा हृताची रात्रिः स्वाहा-कृतो व मिनीतमीति रभसः । हारामहादेवरतात्मात कृ-त्यसै । प्रयोगः । चेदिति चित संवेदने चरादिः, कृतोऽपि प्रत्ययलोपलक्षणेन गुणः । मुक्तिः कैवल्यनिर्वाण श्रेयो निःश्रेयसामृतमित्यमरः । अत्रेति [illegible]

स्तिभ्रमं ते ॥ १४ ॥ दृष्टिं देहि पुनर्बाले
कमलायतलोचने । श्रूयते हि पुरालोके
विषस्य विषमौषधम् ॥ १५ ॥ अन्तर्गता
मदनवह्निशिखावलीया, सा बाधते भि-
न्नचन्दनचर्चितेन । यः... कुम्भकार-

नविद्यते वीरावर्त्तिर्यत्रेति क्रियाविशेषणमस्य नपुंसकत्वादलुक्समासादिति अमु तपस्विवदेचेष्टती चक् ॥ १४ ॥

दृष्टिमित्यादि । कश्चिद्भगवतीं संविवेदयति । हे कमलायतलोचने कमलायाल्लक्ष्म्या आयमागमं तनोति यः तादृशं लोचनं दर्शनं यस्या त्वद्दर्शनादेव लक्ष्मीलाभः स्यादिति । बाले शिशौनयि पुनर्दृष्टिं देहि, ननु मद्दर्शनात् कतिदानवाः भस्मीभूता स्तत्तेन किमित्याशङ्क्याह, नवैयं दृष्टि र्हि पुरा-लोके, अहीनां क्रूराणां शत्रुणां पुरस्य शरीरस्यालोके हि श्रूयते श्रुतिवाक्येभ्यः शास्त्रबोधविषयीक्रियते, आत्मा श्रोत-व्य इति यत् अन्यत्वविषस्यौषधमिति, अतो दृष्टिपाताद्वै कृतार्थः स्यामितिभावः । बालइत्यनेन विषमपधाशेटः प्रति-पादितः। कहिर्व्वेष्यहिः क्रूरेष्यहिःसर्पेस्मृतो बुधैरिति धरणिः। देहे पाटलिपुत्रेच पुरं स्याद्गुग्गुलौपुर इति पुरुषोत्तमः ॥ १५ ॥

अन्तर्गतइत्यादि। कामसुखस्य पारमार्थिकदुःखजनकत्वं साधयितुमाह । हे मदन काम, अन्तर्गता वह्निशिखाज्वलन-ज्वालेव देदीप्यमानत्वात् आलीत्यर्थः । अन्तर्लीनीभूय आमासिता, अतो दृष्टं नशक्यतइत्यर्थः। हे बाधं हिंसक इह आत्मनि ते तव चन्दनचर्चितेन सुखाबलोकेन किं न

पवनोपरि पक्कलेपस्तापायकेवलमसौ नच तापशान्त्यै ॥१६॥ दृष्ट्वा यासां नयनसुषमां वक्रवाराङ्गनानां देशत्यागः परमकृतिभिः कृष्णसारैरकारि। तासामेव स्तनयुगजिताः कुम्भिनः सन्ति मत्ताः प्रायो मूर्खः

किमपीत्यर्थः। प्रत्युत दुःखजनकतां साधयति, यदित्यादिव-त्प्रायम्। पवनं स्यात् पात्रपाकार्थं कुम्भकाराणां गर्त्तभेदः पुन्न इतिख्यातः। पवनं कुम्भकारस्य पाकस्थाने नपुंसकम्। निष्पाव मरुतोः पुंसीति मेदिनिः। चन्द्रेति, चदि आह्लादने दीप्तौ चेत्यतो युट। वाध इत्यामन्त्रणपदस्यासिद्धत्वेऽपि आमा-इति पूर्व्वतरपदमाश्रित्यते इत्यादेशः ॥१६॥

दृष्ट्वेत्यादि। कृष्णः सारो येषां तैः कृष्णपरायणैः। वक्रवाराङ्गनानाम् छलनखेत्यादिना दक्षके वगिगत्यर्थः वक्रं गमनं वारयन्ति दर्शनालापनादिना तादृशीनामङ्गनानां नयनयोः सुषमामुत्कृष्टां कान्तिम् आबाल्यो व्यामोहस्तत् कारिणीं दृष्ट्वा मत्वा तद्विशिष्टदेशत्यागः कृतः। अस्तु तावदालापसम्भोगादिव्यापारो लोचनचातुरीमेव व्यामोहसम्पादिकां सम्भाव्य तपोवनं गतमित्यर्थः। तासामेव स्त्रीणां स्तनयुगजिताः सम्भोगवशीकृताः कुम्भिनः सन्ति, कुम्भो वेश्याकामुकस्तद्विशिष्टा असत् संसर्गिण इत्यर्थः। अर्थान्तरन्यासमाह मत्ता इत्यादि अमूर्खः पण्डितः प्रायः परिभवविधौ परनिष्पाद्यमानात्माभिभवविधौ अभिमानं म्लानं तनोति मत्त्वा मूर्खा इति तस्मात् असत्संसर्गपरिहारे पाण्डित्येनावश्यमेव यतनीयमित्युपदिष्टम्।

Digitized by Google

परिभवविधौनाभिमानं तनोति ॥ १७ ॥
अपूर्व्वोदृश्यते वह्निःकामिन्याःस्तनमण्ड-
ले। दूरतोदहते गात्रं हृदिलग्नस्तु शी-
तलः॥ १८ ॥ कथमेतत् कुचद्वन्द्वं पतितं

[अपूर्व इत्येकवचनेन विरलत्वं प्रत्ताइति बहुवचनेनाविरलत्व
मप्यपीपदत्। सुषमापरमा शोभेत्यमरः। अभिमानोऽर्थादि
दर्पे ज्ञाने प्रणयर्हिंसयोरित्यपि। कुम्भोमारस्त्रियाः कान्ते रक्षो-
राशिप्रभेदयोरिति पुरुषोत्तमः॥ १७॥

अपूर्व्वइत्यादि। कश्चिज्जितेन्द्रियः कांश्चित् कामजयोपाय-
मुपदिशति। कामिन्याः स्त्रियाः मण्डलेनस्तन तिष्ठत कुल-
इत्याह यतोऽयं दुःपरितापकोऽपूर्वः अद्भुतो वह्निर्दृश्यते कीदृक्
शीतलः शीतोऽलसोजडइति यावत्। भावप्रधान निर्देशाच्छै-
त्यार्थः तल्लाति ददाति जाड्यमदित्यर्थः। वह्नेः शीतलत्वं विरु-
द्धमित्यपूर्वत्वमेव तथा हृत् जहर्त्ति प्रभ्रह्मीकरोति इति
क्विप् ह्रप्रसह्यकरणे जुहोत्यादिः। तथा हृलग्नः औ कामे
सक्तः। अतएतेनोपायेन इगात्रं कामशरीरं दहत कामं जय-
तेत्यर्थः। एतेन कामस्य प्रधानसामग्रीभूतकामिनीसंसर्ग
परित्यागादेव जयः सुकरइति। तथाच प्रबोधचन्द्रोदये चन्द्र-
स्मन्दनमिन्दुधामधवला रात्रिर्द्विरेफावली झङ्कारोन्मुखरा वि-
लास विपिनः प्रान्तोवसन्तोत्सवः। सान्द्रध्वानघनोदयाश्च दि-
वसा मन्दाः कदम्बानिलाः शृङ्गारप्रमुखाश्चकामसुहृदोनार्य्या
जितायां जिताः॥ १८॥

कथमित्यादि। कश्चित् कश्चित् कलहायमानं हितोपदे-
शद्वारा शिक्षयति। हे त हे शठक कथंद्वन्द्वं कलहः पतितमुप

तव सुन्दरि । पश्चाधस्खनमान्मूढ पतन्ति गिरयोऽपि च ॥ १९ ॥ कुसुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते । बाले तव

स्थितं तवोत गर्भः ॥ कुच कलहात् सङ्कुचितीभव कलहं दूरेत्यर्थः, कुतइत्याह, एतद् दनहंदम् अधः परकाले खननात् भीड़नाद्वाग्नि पद्य आनीहि इयोर्ग्गमनजनत्वात् । एतत् कलहजन्मापूर्वं परलोकेऽस्मिन्नपि वतप्रतीत्यर्थः किम्भूतं दरि साधूनां भयजनकम् । ननु परलोकाभावे कुतएतत्कल्प्यते त्याह मूढानुमूलयति । हेमूढ गिरयो महान्तोऽपि पतन्ति किं पुनस्त्वमल्पक इति, खननात् कालेन खननादित्यत्वान्वेतव्यं वा । तथाच न केपि स्थातारः सुरगिरिपयोधिप्रभृतय इति शान्तिशतके । तकारस्तस्करे गर्भे क्रोडे पुच्छे तथा शठे इति कोषान्तरम् । दनहं कलहयुग्मयोरित्यमरः । देवभेदेऽनले रश्मौ वसुरत्ने धनेऽपि च । अधइति पूर्वाधरयोरसिद्ध पुरधौवेति सद्यआद्यत्वात् साधुरिति । दरीति दृभये घटादिः दरयतीति णिम् दर शब्दाङ्गचार्थान्मन्वर्थीयो वा जन्यतासम्बन्धेनान्वयः ॥ १९ ॥

कुसुमइत्यादि । कश्चिन्नगयतीं प्रार्थयते । हे कुसुमे भक्तप्रतिपादितपुष्पविशिष्टे तव कुसुमोत्पत्तिः श्रूयते कुसुमपदं यन्त्रोपलक्षणं तत्र तवोत्पत्तिर्भूलयोगेन श्रूयते तथाच जन्मस्थानं महात्म्यमित्यादि तन्त्वेष्वनुसन्धेयं तवइन्दीलक्ष्मीःशोभा कथं न दृश्यते अतो बाले शिशोर्मयि दृयमेतत् सन्तापस्यगमनं वर वारय प्रत्यक्षरूपाभवेति प्रार्थनं ॥ हे मुखाम्भोजे इति सम्बोधनान्तरं मुखमम्भोजं पद्मं यस्याः हे पद्ममुखीत्यर्थः । यद्वा मुखानि दानवसम्बन्धीनि अम्भोजानिव यस्याः तस्मालाधार-

मुखाम्भोजे कथमिन्दीवरद्वयम् ॥२०॥ अयि मन्मथचूतमञ्जरि श्रवणायतचारुलोचने । अपहृत्य मनः क्वयासि तत् किमराजकमत्र राजते ॥ २१ ॥ कोपस्त्वयाहृदि कृतो

णात् । किंवा मुखेनन्द्वादौ अम्भोजश्चन्द्रो विन्दुरूपो यस्याः मन्द्वादेर्नादयुक्तत्वात् । अथवा मुखं मुखस्थानीयोऽम्भोजोऽर्द्ध-चन्द्रो नादव्यपदेशो यस्याः अस्य च रहस्यं गुरूपदेशतोऽवगन्तव्यं नेह प्रतन्यतेऽप्रकाश्यत्वात् । अजशब्दवत्प्रतिसंस्कारेणाम्भोज-शब्दस्यापि चन्द्रवाचकत्वम् । इन्दिशरेन्दीरमालक्ष्मीरिति विश्वाल्ङ्गशः । द्वयमिति दुङ्उपतापेसम्पदादित्वाद्भावेक्विप् । तस्या अयोगमनम् इणधातोरत्र बाहुल्यादितिषष्ठ्यर्थेसप्तमी ॥२० ॥

अयिइत्यादि । कश्चिद्विषयासक्तं चित्तमाक्षिपति । अयि-मनस्तत् आत्मकं म जायत इत्यजः परमात्मा ब्रह्मरूपस्तत् सम्ब-न्धिकं सुखं अपहृत्य विहायक्वयासि । सम्बोधनत्वमाह मन्मथः काम एव चूतवृक्षस्तस्य मञ्जरि मञ्जरीशब्देनात्र जन्यत्वेन बीजं लक्ष्यते चूतपदं फलवाचकं वा कामबीजेत्यर्थः कामस्य मनोजत्वात् । हे श्रवणायत श्रवणाद्यत अभिवृत्त यमउपरमे क्तः । हे चारुलोचनेऽर गमनकारक । अथवा आयणाद्यत मनिवर्त्तनं भावे क्तः, चारुरमणीयं यस्य इत्येकं पदं नपुंसक सम्बोधने पक्षेगुणाभावः आद्येन सम्बोधनेन कामरसानुसारित्वं द्वितीयेन श्रोतव्यास्वरानुसारित्वं, तृतीयेन रूपानुसारित्वञ्च प्रत्यपादि, ततः किंकर्त्तव्यमित्याह अत्रआजके अस्य ब्रह्मसम्ब-न्धिसुखस्य षष्ठ्यर्थेसप्तमी, ते विस्तराय राज शोभस्व, ते इति तायृसन्तानपालनयोः भावेक्विप् योर्व्यञ्जनइति यलोपः तत आधातो रित्याकारलोपः किलताय्यितेत्यर्थः ॥ २१ ॥

Digitized by Google

यदि पङ्कजाक्षि, सोऽस्तु प्रियस्तव किमत्र
विधेयमन्यत्। आश्लेषमर्पय मदर्पितपूर्व्व
मुच्चैर्दन्तक्षतं मम समर्पय चुम्बनञ्च।।२२॥

इति महाकवि श्रीकालिदासविरचितं
शृङ्गारतिलकं समाप्तम्॥

कोपइत्यादि। कश्चिन्निर्व्विण्णो लक्ष्मीमाचिष्टे। हे पङ्कजाक्षि। पङ्कजाक्षः पुण्डरीकाक्षो विष्णुस्तत्पत्नि हे लक्ष्मीरित्यर्थः। यदि त्वया कोपोहृदिकृतस्तदा मम स प्रियो ममाभिलषितेऽस्तु अत्रान्यत्तत्र किं विधेयं त्वया किं विधातुं शक्यं वाकर्त्तरि कृत्य- इति कर्त्तरि षष्ठी। अर्पितपूर्व्वं मयि पूर्व्वमाहितं आश्लेषं सम्पर्कं मत् मां विहाय,यब्लोपेपञ्चमी अन्यत्रार्पय तथा मम मत्कर्त्तृकं चुम्बनं पल्लवम्पाहितं धर्त्ततां वा अन्यत्र समर्पय श्रियोऽवले पेनैव तदाश्रयणात्, चुविधातुरत्र धूर्त्तक्रियायां अतश्चुम्बको धूर्त्त उच्यते, तथाच मेदिनिकरः। चुम्बकस्त्वगपदे धुत्ताय स्कान्तयोरपि इति। किम्भूतं तदुभयं दन्तक्षतं दन्तःसानु पर्व्वतस्य नमभूमिः अत्रतद्गमने लक्षणा तस्यक्षतं क्षतिर्यस्मात् तपोवनगमनव्याघातमित्यर्थः। दन्तोनिकुञ्जे दशने दन्तः सानुनिकथ्यतइतिधरणिः॥ २२॥

शृङ्गं प्राधान्यमियर्त्तीत्यणि शृङ्गारप्रधानभूतस्तस्य तिलक मिव तिलकम् अलङ्काररूपमित्यर्थः। शृङ्गं प्राधान्य सान्वो श्चेत्यमरः।

इति वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्र विरचित
शृङ्गारतिलकटीका सम्पूर्णा।

Digitized by Google

Digitized by Google

# विज्ञापनम्।

| संस्कृतम्। | रु० | आ० |
| --- | --- | --- |
| चक्रदत्तः | २ | ८ |
| सूर्यसिद्धान्तः | १ | ८ |
| भाषापरिच्छेदः | १ | ० |
| शिशुपालबधम् | ६ | ० |
| मुक्तिकोपनिषत् | ० | २ |
| मेघदूतम् | ० | ८ |
| रघुवंशम् | २ | ० |
| कुमारसम्भवम् | ० | ८ |
| नलोदयः | ० | १० |
| ऋतुसंहारः | ० | ६ |
| चरकसंहिता, १मखण्डम् | १ | ८ |
| किरातार्ज्जुनीयम् | २ | ८ |
| पूर्व्वनैषध चरितम् १।२यखण्ड | १ | १४ |
| श्रीमद्भगवद्गीता | ६ | ० |
| वेणीसंहारः | १ | ० |
| सुश्रुतः आयुर्वेदः | ४ | ० |
| विवेकचूड़ामणिः | ० | ६ |
| उत्तरकुमारसम्भवम् | ० | ६ |
| साहित्यदर्पणः | १ | ८ |
| किरातार्ज्जुनीयम्, मूलमात्रम् | ० | ६ |
| दशकुमारचरितम्. पूर्व्वोत्तरखण्डद्वयम् | १ | २ |
| वसन्ततिलकभाणः | ० | ६ |
| धातुमञ्जरी, | ० | १२ |
| गीतगोविन्दराधाविनोद, | ० | १० |
| अभिज्ञानशाकुन्तलम् | ० | १२ |
| सूर्य्यशतकम् | ० | २ |

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

This book should be returned to the Library on or before the last date stamped below.

A fine of five cents a day is incurred by retaining it beyond the specified time.

Please return promptly.

WIDENER
BOOK DUE
1985
CANCELLED
MAR 21 1985

Digitized by Google

IndL 1501.14
Widener Library 003382652
3 2044 092 179 936